भद्रकाशी, स्त्री, ( भद्राय काशते इति। काश+ अच्। गौरादित्वात् ङीष्। ) भद्रमुस्ता। इति राजनिर्घण्टः॥

भद्रकुम्भः, पुं, ( भद्रस्य भद्राय वा कुम्भोऽथवा भद्रः कुम्भः। ) पूर्णकुम्भः। इत्यमरः। २। ८। ३२॥

भद्रगन्धिका, स्त्री, ( भद्रो गन्धोऽस्यास्तीति। ठन्। टाप्। ) मुस्तकम्। इति रत्नमाला॥

भद्रङ्करः, त्रि, ( भद्रं करोतीति। कृ+"बाहुलकात् खच्। मुम् च। ) मङ्गलकारकः। तत्पर्य्यायः। क्षेमङ्करः २ क्षेमकारः ३ मद्रङ्करः ४ शुभङ्करः ५ अरिष्टतातिः ६ शिवतातिः ७ शङ्करः ८। इति भूरिप्रयोगः॥

भद्रचूडः, पुं, ( भद्रा चूडास्य। ) लङ्कास्थायी। इति शब्दचन्द्रिका। लङ्कासिज इति भाषा॥

भद्रजः, पुं, ( भद्राय जायते इति। जन+डः। ) इन्द्रयवः। इति राजनिर्घण्टः॥ ( गुणादयोऽस्येन्द्रयवशब्दे ज्ञातव्याः॥ )

भद्रतरुणी, स्त्री, (भद्रा तरुणीव।) कुब्जकवृक्षः। इति राजनिर्घण्टः॥ ( तथास्या अन्यतरः पर्य्यायः।

"कुब्जको भद्रतरुणी वृहत्पुष्पोऽतिकेसरः।
महा सहा कण्टकाढ्या नीलालिकुलसङ्कुला॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥ )

भद्रतुरगं, क्ली, ( भद्रा तुरगा अत्र। ) जम्बूद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। यथा,—

"माल्यवज्जलधिमध्यवर्त्ति यत्तु भद्रतुरगं जगुर्बुधाः।"

इति सिद्धान्तशिरोमणौ गोलाध्यायः॥

भद्रदन्तिका, स्त्री, ( भद्रा दन्तिका। ) दन्तीवृक्षभेदः। भद्रदन्ती इति ख्याता। तत्पर्य्यायः। केशरुहा २ भिषग्भद्रा ३ जयावहा ४ आवर्त्तकी ५ ज्वराङ्गी ६ जयाह्वा ७। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। रेचनत्वम्। क्रिमिशूलकुष्ठामदोषतुन्दामयनाशित्वञ्च। इति राजनिर्घण्टः॥

भद्रदारु, क्ली, पुं, ( भद्रं दारु। ) देवदारु। इत्यमरभरतौ॥ सरलकाष्ठम्। इति रत्नमाला॥

भद्रदार्व्वादिकः, पुं, (भद्रदारु आदौ यस्य कप्।) औषधगणविशेषः। यथा। भद्रदारुकुष्ठहरिद्रावरुणमेषशृङ्गीबलातिबलार्त्तगलकच्छुराशल्लकीकुवेराक्षीवीरतरुसहचराग्निमन्थवत्सादनैरण्डाश्मभेदकालर्ककाकशतावरीपुनर्नवावसुकवशिरकाञ्चनकभार्गीकार्पासीवृश्चिकालीपत्तूरबदरयवकोलकुलत्थप्रभृतीनि। इति सुश्रुतसूत्रस्थानस्य संशोधनसंशमनीयाध्यायः॥ * ॥ अपिच।

"देवदारु हरिद्रे द्वे वरुणः कुष्ठमेव च।
महानिम्बं नागबला श्यामला गरलोऽपरः॥
पाटला चात्मगुप्ता च शुण्ठी पाषाणभेदिका।
शतावरी चार्कमूलं गुडूची गणिकारिका॥
पुनर्नवा च वास्तूकश्च्यावर्त्तकाञ्चनम्।
गोक्षुरं शरमूलञ्च कुशमूलं समाषिकम्॥
ऊनचत्वारिंशद्द्रव्यैर्भद्रदार्व्वादिको गणः॥"

इति शब्दचन्द्रिका॥ * ॥

एतन्मध्ये चतुर्द्दशद्रव्याणि न प्राप्तानि॥

भद्रनामा, [ न् ] पुं, (भद्रं नाम यस्य।) काष्ठकुट्टपक्षी। इति त्रिकाण्डशेषः। काठ्ठाकरा इति भाषा॥

भद्रनामिका, स्त्री, (भद्रं नामास्याः। कप्। टाप्। अत इत्वम्।) त्रायन्तीवृक्षः। इति रत्नमाला। वहला इति भाषा॥

भद्रनिधिः, स्त्री, ( भद्रा निधयोऽत्र। ) महादानविशेषः। यथा,—

इन्द्र उवाच।

"विधानं ब्रूहि मे ब्रह्मन्! दानस्यास्य महानिधेः।
यथा देव! विशेषेण विष्णोरानन्दकारकम्॥"

ब्रह्मोवाच।

"पुण्यां तिथिं प्राप्य तु पौर्णमास्यां
तथोपरागे शशिसूरयोर्वा।
चतुर्युगादिष्वयनद्वये वा
प्रबोधने प्रस्वपनेऽथ विष्णोः॥
कुर्य्यादथौडुम्बरमेव कुम्भं
हिरण्मयमानेन यथात्मशक्त्या।
तथा पिधानञ्च सुराजतं स्याद्-
हिरण्यभारेण तु पूरयेत्तत्॥
तदर्द्धतोऽर्द्धेन तदर्द्धतो वा
स्वशक्तितः स्वर्णपलैः शतेन।
तदर्द्धमध्येन तु वित्तशक्त्या
पलत्रयादूनमथो न कुर्य्यात्॥
तत्ताम्रभाण्डे कनकं निधेयं
सवज्रनीलोत्तमपद्मरागम्।
सुमुक्तवैदूर्य्यसविद्रुमञ्च
तद्राजतं पात्रमधोमुखं स्यात्॥
एवन्तु तं भद्रनिधिं सुविद्वान्
कृत्वासने प्रावरणोपयुक्ते।
कुशोत्तरे दर्पणचामराढ्ये
सपादुकोपानहछत्रयुक्तम्।
तं क्षौमवस्त्रोत्तमयुग्मयुक्तं
सम्पूजयेन्माल्यवरै रथैतम्॥
आदौ तु पश्चात्तमथाप्य विष्णुं
संस्नाप्य संसारतरं समर्च्च्य।
तथेश्वरं पावकमेव हुत्वा
आमन्त्रयेद्भद्रनिधिं ततस्तम्॥
श्रीखण्डकर्पूरसकुङ्कुमेन
पद्माचरं नाम श्रियः प्रलिख्य।
नमस्तथोङ्कारयुतञ्च पात्रे
तद्राजतेऽप्येवमथार्च्चयेत्ताम्॥
त्वया समस्तामरसिद्धयक्ष-
विद्याधरेन्द्रोरगकिन्नरेन्द्रैः।
गन्धर्व्वदैत्यासुरदानवेन्द्रै-
र्युतं धृतं विश्वमिदं नमस्ते॥
समस्तसंसारकरी त्वमेव
विभोः सदानन्दमयी च माया।
समस्तकल्याणनिधिः समाधि-
र्हरिप्रिये! भद्रनिधे! नमस्ते॥
एवं संपूज्य विधिना ततो विप्रमथार्च्चयेत्।
किरीटाङ्गदनिष्काग्र्यकुण्डलाङ्गुलिभूषणैः॥
अलंकृत्य हरिं यद्वत् पीताम्बरधरं ततः।
पूजयेदच्युतं ध्यात्वा मन्त्रेणानेन भक्तिमान्॥
भूदेवोऽसि विभो! नित्यं नित्यानन्दमयो हरे!।
हर मे दुष्कृतं कृष्ण! कृपाकर! नमोऽस्तु ते॥
भूदेव! भगवान् भर्ग भवभङ्गकरेश्वर!।
भवभूतिकरो जिष्णो! प्रभविष्णो नमोऽस्तु ते॥
एवं पूज्य हृदि ध्यात्वा तं द्विजं ब्रह्मरूपिणम्।
ततो भद्रनिधिं दद्यान्मन्त्रेणानेन वासव!॥
स्वगोत्रोच्चारणेनादौ विप्रनाम तथात्मनः।
यवदर्भतिलैः सार्द्धमुदकं संपरित्यजेत्॥
पितृसन्तारणार्थाय नित्यानन्दविवृद्धये।
सर्व्वाघौघविघाताय विष्णोर्दानं मया कृतम्॥
तदनेन सरत्नेन धातुत्रययुतेन च।
सक्षौमाम्बरयुक्तेन सादर्शपादुकेन च॥
सासनेन सच्छत्रेण चामरोपानहेन च।
सदानन्दनिधानेन प्रीयतां विष्णुरीश्वरः॥
एवमुच्चार्य्य तं दद्याद्द्विजाय हरिरूपिणे।
गोप्येन विधिना दद्याद्धेमसंख्यां न कीर्त्तयेत्॥
प्रकीर्त्तिते कोटियुगायुतं फलं
प्रगोपिते कल्पगणैर्न संक्षयः।
इतीयमज्ञो न तु कीर्त्तयेत् सुधी-
र्निधानमध्ये निहितञ्च यद्वसु॥
एवं कृते स्यात्मनुजः कृतात्मा
तपेन्न च स्वामरणं कदाचित्।
प्रयाति विष्णोः पदमव्ययं तत्
शिवात्मकानन्दमयं सदाख्यम्॥"

इत्याद्ये वह्निपुराणे भद्रनिधिदाननामाध्यायः॥

भद्रपदा, स्त्री, ( भद्रं पदमासाम्। ) भाद्रपदा। पूर्ब्बभाद्रपदोत्तरभाद्रपदानक्षत्रम्। इत्यमरटीकायां रायमुकुटः॥ ( यथा, वृहत्संहितायाम्। ६। २।

"नगा तु पवनयाम्या
नलानिपैतामहात् त्रिभास्त्रिसः।
गोवीथ्यामश्विन्यः
पौष्णं द्वे चापि भद्रपदे॥")

भद्रपर्णा, स्त्री, ( भद्राणि पर्णान्यस्याः। टाप्। ) कटम्भरावृक्षः। इति शब्दमाला॥ (गुणादिकमस्याः कटम्भराशब्दे विज्ञतम्॥)

भद्रपर्णी, स्त्री, (भद्राणि पर्णान्यस्याः। गौरादित्वात् ङीष्।) गाम्भारी। इत्यमरः। २। ४। ३६॥ ( अस्याः पर्य्यायो यथा,—

"गाम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका॥
काश्मिरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी।
कृष्णवृन्ता मधुरसा महाकुसुमिकापि च॥" )

प्रसारिणी। इति जटाधरः॥ (अस्याः पर्य्यायो यथा,—